सन्दितः, त्रि, (सं + दो अवखण्डने + क्तः ।) बद्धः । इत्यमरः ॥

सन्दिष्टं, क्ली, (सं + दिश + क्तः ।) वार्त्ता । इति शब्दरत्नावली ॥ कथिते, त्रि ॥

सन्दिष्टार्थः, पुं, (सन्दिष्टोऽर्थो यस्य ।) सन्देशहरः । इति केचित् ॥

सन्दिहान, त्रि, (सं + दिह + शानच् ।) सन्दिग्धः । यथा, जटाधरः ।
"सन्दिहानः सांशयिकः संशयापन्नमानसः ॥"

सन्दी, स्त्री, खट्वा । यथा । निषद्या खट्टिका सन्दी । इति त्रिकाण्डशेषः ॥

सन्दीप्यः, पुं, मयूरशिखावृक्षः । इति शब्दचन्द्रिका ॥

सन्देशः, पुं, ( सं + दिश + घञ् । ) संवादः । इति शब्दरत्नावली ॥ (यथा, मेघदूते । ७ ।
"सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम् ॥")
स्वनामख्यातमिष्टान्नविशेषश्च ॥

सन्देशवाक्, [ च् ] स्त्री, ( सन्देश एव वाक् ।) संवादः । तत्पर्य्यायः । वाचिकम् २ । इत्यमरः ॥

सन्देशहरः, पुं, ( हरतीति । हृ + अच् । सन्देशस्य हरः । ) दूतः इत्यमरः ॥ ( यथा, रघुः । ३ । ६६ ।
"तवैव सन्देशहरात् विशांपतिः ।
शृणोति लोकेश । तथा विधीयताम् ॥")

सन्देशहारकः, पुं, (सन्देशं संवाद हरतीति । हृ + ण्वुल् । ) दूतः । इति हेमचन्द्रः ॥

सन्देहः, पुं, (सं + दिह + घञ् ।) एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्यायः । विचिकित्सा २ संशयः ३ द्वापरः ४ । इत्यमरः ॥ ( यथा, महाभारते । ३ । ५७ । ११ ।
"तान् समीक्ष्य ततः सर्व्वान् निर्विशेषाकृतीन् स्थितान् ।
सन्देहादथ वैदर्भी नाभ्यजानान्नलं नृपम् ॥")

सन्दोहः, पुं, (सं + दुह + घञ् ।) समूहः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ५८८ ।
"स्तननूतननखलेखालम्बो तव घर्म्मबिन्दुसन्दोहः ।
आभाति पट्टसूत्रे प्रविशन्निव मौक्तिकप्रसरः ॥")

सन्द्रावः, पुं, (सं + द्रु + "समि युद्रुदुवः ।" ३।३। २३ । इति घञ् ।) पलायनम् । इत्यमरः ॥

सन्धा, स्त्री, (सं + धा + अङ् ।) स्थितिः । प्रतिज्ञा । इति मेदिनी ॥ (यथा, रघुः । १४ । ५२ ।
"गङ्गां निषादाहृतनौविशेषस्ततार सन्धामिव सत्यसन्धः ॥")
सन्धानम् । इति शब्दरत्नावली ॥ सन्ध्या । यथा । सन्धा त्रिशमैत्री पितृप्रसूः । इति भरतधृतवाचस्पतिः ॥

सन्धानं, क्ली, (सन्धीयते यदिति । सं + धा + ल्युट् ।) मद्यसन्धीकरणम् । इति नयनानन्दः ॥ तत्पर्य्यायः । अभिषवः २ । इत्यमरः ॥ सन्धानी ३ सन्धिका ४ । इति शब्दरत्नावली ॥ सन्धीयते सन्धानं वंशाङ्कुरफलादीन् बहुकालं सन्धाय, यत् क्रियते । इति भरतः ॥ सङ्घट्टनम् । इति मेदिनी ॥ (यथा, कुमारे । ५ । २७ ।
"मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम् ॥")
काञ्जिकम् । इति हलायुधः ॥ मदिरा । अवदंशः । सौराष्ट्रम् । इति राजनिर्घण्टः ॥ धनुषि बाणयोजनम् । यथा,
"तदाशु कृतसन्धानं प्रतिसंहर शायकम् ।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि ॥"
इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥
अन्वेषणम् । इति लोकप्रसिद्धम् ॥ ( सन्धिः । यथा महाभारते । ५ । १० । ३३ ।
"एवं कृते तु सन्धाने वृत्रः प्रमुदितोऽभवत् ।
यत्तः समभवच्चापि शक्रो हर्षसमन्वितः ॥")
सन्दधातीति । सं + धा + ल्युः । धारके, त्रि । यथा, सुश्रुते । १ । ४५ ।
"मधु तु मधुरं कषायानुरसं * * हृद्यं सन्धानं शोधनं रोपणमिति ॥")

सन्धानिका, स्त्री, (सन्धानमस्त्यस्या इति सन्धान + ठन् । ) खाद्यद्रव्यविशेषः । आचार इति भाषा । तत्करणप्रकारको यथा । अपक्वाम्रफलानि विंशतिः राजिका शरावषोड़शैकभागमिता मरिचं तोलकद्वयं लवणं षट्तोलकं मेथिकाद्वितोलकं जीरकं तोलकद्वयं हरिद्रातोलकैकं नागरमुस्तकमेकतोलकं कृष्णजीरकं तोलकैकं गृहीत्वा आम्रभिन्नं सकलद्रव्यं चूर्णयित्वा एकत्रीकुर्य्यात् । आम्रन्तु दीर्घं द्विखण्डं चतुष्खण्डं वा कृत्वा अष्ठीं दूरीकृत्य तदभ्यन्तरे पूर्व्वोक्तचूर्णं पूरयित्वा शलाकया विद्धाखण्डाम्रवत् कुर्य्यात् । ततस्तैले निमज्जयेत् । इति पाकराजेश्वरः ॥

सन्धानितः, त्रि, सन्धानविशिष्टः । सङ्घट्टितः । सन्धानशब्दादितप्रत्ययेन निष्पन्नः ॥

सन्धानिनी, स्त्री, गोगृहम् । इति केचित् ॥

सन्धानी, स्त्री, (सन्धीयते यस्यामिति । सं + धा + ल्युट् । ङीप् ।) कुप्यशाला । इति हेमचन्द्रः ॥ सन्धानम् । इति शब्दरत्नावली ॥

सन्धिः, पुं, (सन्धानमिति । सं + धा + किः ।) राजादीनां षड्गुणान्तर्गतगुणविशेषः । स तु स्वर्णादिदानेन बन्धुभिः प्रीत्युत्पादनात् मित्रीकरणम् । मेल इति ऐक्य इति च भाषा । तद्विवरणं यथा,—
"पनबद्धो भवेत् सन्धिः स्वयं हीनस्तमाचरेत् ।
मर्य्यादोल्लङ्घनं नास्ति यदि शत्रोरिति स्थितिः ॥
मर्य्यादोल्लङ्घनं यत्र शत्रो संशयितं भवेत् ।
न तं संशयितं कुर्य्यादित्युवाच बृहस्पतिः ॥
बलवद्विगृहीतः सन् नृपोऽनन्यप्रतिक्रियः ।
आपन्नः सन्धिभावेन विदध्यात् कालयापनाम् ॥
ये च दैवेनोपहता राष्ट्रं येषाञ्च दुर्गतम् ।
बहवो रिपवो येषां तेषां सन्धिर्विधीयते ॥
दुर्म्मन्त्री भिन्नमन्त्रश्च नीचधर्म्मरतश्च यः ।
एतैः सन्धिं न कुर्व्वीत विशेषात् पूर्वपीड़ितैः ।
सन्धिं हि तादृशैः कुर्व्वन् प्राणैरपि हि हीयते ॥"
इति भोजराजकृतयुक्तिकल्पतरुः ॥ * ॥
षोड़शविधसन्धिर्यथा,—
"बलीयसाभियुक्तस्तु नृपो नान्यप्रतिक्रियः ।
आपन्नः सन्धिमन्विच्छेत् कुर्व्वाणः कालयापनम् ॥
कपाल १ उपहारश्च २ सन्तानः ३ सङ्गत-४ स्तथा ।
उपन्यासः ५ प्रतीकारः ६ संयोगः ७ पुरुषान्तरः ८ ॥
अदृष्टनर ९ आदिष्ट १० आत्मादिष्ट ११ उपग्रहः १२ ।
परिक्रय-१३ स्तथोच्छिन्न-१४ स्तथा च परभूषणः १५ ॥
स्कन्धोपनेयः १६ सन्धिश्च षोड़शैते प्रकीर्त्तिताः ।
इति षोड़शकं प्राहुः सन्धिं सन्धिविचक्षणाः ॥"
तेषां लक्षणानि । यथा,—
"कपालसन्धिर्विज्ञेयः केवलं समसन्धितः ।१।
सम्प्रदानाद्भवति य उपहारः स उच्यते ॥ २ ॥
सन्तानसन्धिर्विज्ञेयो दारिकादानपूर्व्वकः ।३
सद्भिस्तु सङ्गतः सन्धिर्म्मैत्रीपूर्व्व उदाहृतः ॥
यावदायुःप्रमाणस्तु समानार्थप्रयोजनम् ।
सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते ॥
सङ्गतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत् ।
तथान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः ॥४॥
द्रव्यात्मा कार्य्यसिद्धिस्तु समुदिश्य क्रियेत यः ।
स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ ५ ॥
मयास्योपकृतं पूर्व्वं ममाप्येष करिष्यति ।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते ॥"
अन्यच्च ।
"उपकारं करोम्यस्य ममाप्येष करिष्यति ।
अयञ्चापि प्रतीकारो रामसुग्रीवयोरिव ॥६॥
एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति ।
समं हि तत्प्रमाणेन स च संयोग उच्यते ॥७॥
आवयोर्य्योधमुख्यैस्तु मदर्थः साध्यतामिति ।
यस्मिन् पणस्तु क्रियते स सन्धिः पुरुषान्तरः ॥८
त्वयैकेन मदीयोऽर्थः संप्रसाध्यस्त्वसाविति ।
यत्र शत्रुः पणं कुर्य्यात् सोऽदृष्टपुरुषः स्मृतः ॥९॥
यत्र भूम्येकदेशेन पणेन रिपुवर्ज्जितः ।
सन्धीयते सन्धिविद्भिः स चादिष्ट उदाहृतः ॥१०॥
स्वसैन्येन तु सन्धानमात्मादिष्ट उदाहृतः ।११।
क्रियते प्राणरक्षार्थं सर्व्वदानादुपग्रहः ॥१२॥
कोषांशेनार्द्धकोषेण सर्व्वकोषेण वा पुनः ।
शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः ॥१३॥
भुवां सारवतीनान्तु दानादुच्छिन्न उच्यते ।१४।
भूम्युत्थफलदानेन सर्व्वेण परभूषणः ॥ १५ ॥
प्रतिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते ।